# Shri Bhuvaneshvari Ashtottarashatanama Stotram

# શ્રીભુવનેશ્વર્યષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Bhuvaneshvari Ashtottarashatanama Stotram 3

File name : bhuvaneshvaryaShTottarashatanAmastotram3.itx

Category : aShTottarashatanAma, devii, stotra, devI, dashamahAvidyA

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description-comments : Kalivilasatantra. See corresponding nAmAvalI

Latest update : March 23, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 6, 2024

*sanskritdocuments.org*

# શ્રીભુવનેશ્વર્યષ્ટોત્તરશતનામસ્તોત્રમ્

(અથ શ્રીકાલીવિલાસતન્ત્રે દશમઃ પટલઃ ।)
શ્રીદેવ્યુવાચ ।
દેવદેવ મહાદેવ યોગીન્દ્ર વૃષભધ્વજ ।
અસ્યાઃ શ્રીભુવનેશ્વર્યાઃ શતનામ વદ પ્રભો ॥ ૧॥

શ્રીઈશાન ઉવાચ ।
સહસ્રેણ મહેશાનિ કલિકાલે ન સિદ્ધ્યતિ ।
શતનામ્નઃ પરં નામ કલૌ નાસ્તિ મહેશ્વરિ ॥ ૨॥

અસ્ય શ્રીભુવનેશ્વરી શતનામસ્તોત્રસ્ય શક્તિરૃષિ
વિરાટ્છન્દઃ શ્રીભુવનેશ્વરી દેવતા ચતુર્વર્ગસિદ્ધ્યર્થે વિનિયોગઃ ॥

ૐ આદ્યા શ્રીભુવનાભવ્યા ભવબન્ધવિમોહિની ।
ભગરૂપા ભગવતી ભેરણ્ડા ભાગ્યશાલિની ॥ ૩॥

ઈશ્વરી ઈશ્વરાનન્દા વન્દનીયા વિલાસિની ।
ઉમા ઊમા ચ (૧)ઉન્મત્તા ઇન્દિરા ઇન્દ્રપૂજિતા ॥ ૪॥

ઊર્ધ્વ-તેજસ્વિની ઊર્ધ્વા ઊર્ધ્વગા ઊર્ધ્વરૂપિણી ।
નન્દિની નન્દમથિની નન્દા નન્દકરૂપિણી ॥ ૫॥

નિત્યા ચ નિષ્કલઙ્કા ચ નિર્મલા મલનાશિની ।
નિરીહોલ્લાસિની નત્યા નિર્મલા નિત્યનૂતના(૨) ॥ ૬॥

નિશુમ્ભનાશિની ચૈવ તથા શુમ્ભવિનાશિની ।
શુક્લરૂપા ચ શુક્લાર્હા શામ્ભવી શમ્ભુવલ્લભા ॥ ૭॥

શિવાખ્યા શિવરૂપા ચ શિવપૂજ્યા શિવાર્ચિતા ।
શિવવાદા (૩)ચ શ્યામા ચ શ્યામાઙ્ગી શ્યામમૂર્ત્તિકા ॥ ૮॥

શોભા ચ સુભગા ચૈવ શોભના ભુવનેશ્વરી ।

રક્તાઙ્ગી રક્તનયના રક્તાક્ષી રક્તલોચના ॥ ૯॥

રેવતી રુક્મિણી રાધા રૌદ્રી રામા રજોગુણા ।
રમ્યા ચ રમણીયા ચ રામક્રીડાવતી તથા ॥ ૧૦॥

રામાર્ચિતા રામપૂજ્યા રઙ્ગિની રામવલ્લભા(૪) ।
રક્તાક્ષી રક્તહાસ્યા ચ રુધિરા રુધિરપ્રિયા ॥ ૧૧॥

રક્તારક્તમયી રાજ્ઞી રસયુક્તા રસપ્રિયા ।
રસમાલા રસમયી તથા રસવતી રતિઃ ॥ ૧૨॥

રૂપમાલા રૂપવતી રૂપાઙ્ગદવિભૂષણા ।
રેણુકા રેત(૫)રૂપા ચ રસરૂપા રસાશ્રયા(૬) ॥ ૧૩॥

ભાગીરથી તથોન્નાસાં(૭)વશિની વેશરૂપિણી ।
રેવા ચ શામ્ભવી ચૈવ મૃદાપારણ(૮)પણ્ડિતા ॥ ૧૪॥

શતનામ ઇદં દેવિ કથિતં ભક્તિતસ્તવ ।
ગુહ્યાદ્ ગુહ્યતરં ગુહ્યં કલિકાલસ્ય સમ્મતમ્ ॥ ૧૫॥

અષ્ટોત્તરશતં જપ્ત્વા દશધા વાપિ સુન્દરિ ।
પઠિત્વા ફલમાપ્નોતિ અયુતં વરવર્ણનિ ॥ ૧૬॥

અયુતાવર્ત્તનાદ્દેવિ ચાશ્વમેધફલં લભેત્ ।
ગોમેધશતયજ્ઞાનાં ફલમાપ્નોતિ નિશ્ચિતમ્ ॥ ૧૭॥

પ્રપઠેદ્ યદિ શુદ્ધાત્મા સ્વકીયસ્ત્રીષુ સંરતઃ ।
વામભાગે સ્ત્રિયં સ્થાપ્ય ધૂપામોદ સુગન્ધિતઃ ॥ ૧૮॥

તામ્બૂલ-પૂરિતમુખી યદિ સ્યાજ્જપતત્પરઃ ।
યદ્યપ્યદીક્ષિતા નારી દૂરતઃ પરિવર્જયેત્ ॥ ૧૮॥

દીક્ષિતા-પરનારીષુ યદિ મૈથુનમાચરેત્ ।
ન વિન્દોઃ પાતનં કાર્યં કૃતે ચ બ્રહ્મહા ભવેત્ ॥ ૨૦॥

મૃદાપારગાં મૃત્તિકાવિદારણમિત્યર્થઃ ।
યદિ ન પ્રપતેદ્બિન્દુઃ પરનારીષુ પાર્વતિ ।
સર્વસિદ્ધીશ્વરો ભૂત્વા વિહરેત્ ક્ષિતિમણ્ડલે ॥ ૨૧॥

ઇતિ શ્રીકાલીવિલાસતન્ત્રે શ્રીભુવનેશ્વરી શતનામસ્તોત્રં સમાપ્તમ્ ।
ૐ તત્સદિત્યાદિ ।

૧. ઊશબ્દેનાવ શિવ ઉચ્યતે તેન તસ્ય માતા ઇત્યર્થઃ । “ઉમા ઊમા” ઇત્યવ “ઉમારૂપા” ઇતિ ક્વચિત્ પુસ્તકે પાઠઃ ।

૨. “નૂતના” ઇત્યત્ર “મુત્તમા” ઇતિ ક્વચિત્ પુસ્તકે પાઠઃ । ક્વચિચ્ચ “નિર્લજ્જા નિર્ઘૃણા નિદ્રા નિશ્ચલા નિરૂપ-દ્રવામ્ । ઇત્યધિક લોકાઈ દૃશ્યતે ।

૩. “શિવવાદા” ઇત્યત્ર શવવાદાં ઇતિ ક્વચિત પુસ્તકે પાઠઃ, તસ્વાર્થસ્તુ શવેન સહ વાદઃ કથોપકથન યસ્યાઃ, અથવા શવઃ શિવરૂપઃ શવ ઇતિ તાત્પર્યમ્ ।

૪. રામશબ્દેનાત્ર પરશુરામઃ, બલરામઃ, શ્રીરામશ્ચ યથાયથં જ્ઞેયમ્ ।

૫. સર્વેસાન્તા અપ્યદન્તા ઇતિ નિયમાત્ રેતઃ શબ્દસ્ય રેતરૂપતા ।

૬. “રસાશ્રયા” ઇત્યત્ર “રસપ્રિયા” ઇતિ ક્વચિત્ પુસ્તકે પાઠઃ ।

૭. “ઉન્નાસા” ઇત્યત્ર “ઉલ્લાસા” ઇતિ ક્વચિત્ પુસ્તકે પાઠઃ ।

૮. “મૃદાપા” ઇત્યત્ર “વસુધા” ઇતિ ક્વચિત્ પુસ્તકે પાઠઃ ।

Proofread by Rajesh Thyagarajan

---

*Shri Bhuvaneshvari Ashtottarashatanama Stotram*
pdf was typeset on June 6, 2024

Please send corrections to *sanskrit@cheerful.com*